इति वप्रत्ययः। अथवा वाति गच्छति तद्वत्तया। वा+कः। स्वरूपतस्तेषां भेदाभावादपि वासुदेवे सर्व्वात्मनि परमेश्वरेऽस्य वृत्तिः। अतो विष्णुसंहितायाम्।
"नरसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः" ॥
किञ्च।
"त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः"॥
पूज्यपादैर्भाष्यकृद्भिरपि केशवशब्दस्य निरुक्तिद्वयमवलम्ब्य नामद्वयं समर्थितं तयोराद्ये। अभिरूपाः केशा यस्य स केशवः। कस्य अस्य ईशस्य केशाख्यमूर्त्तयस्ते वशे वर्त्तन्ते यस्य सः। केशिदानवहननाद्वा केशवः।
"यस्मात् त्वयैव दुष्टात्मा हतः केशी जनार्द्दन!
तस्मात् केशवनाम्ना त्वं लोके ज्ञेयो भविष्यसीति"॥
भागवतादिषु। द्वितीये। केशसंज्ञिताः सूर्य्यादिसंक्रान्ता अंशवः तद्वत्त्वेन केशवो वा।
"अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः।
सर्व्वज्ञाः केशवं तस्मात् प्राहुर्म्मां द्विजसत्तमाः"॥
इति महाभारतम्। "त्रयः केशिनः"। इति श्रुतेश्च ब्रह्मविष्णुशिवाख्या हि शक्तयः केशसंज्ञिताः। "मत्केशा वसुधातले" इति भागवते च। यथा, हरिवंशोक्तौ,—
"को ब्रह्मेति समाख्यातः ईशोऽहं सर्व्वदेहिनाम्।
आवां तवांशसम्भूतौ तस्मात् केशवनामवान्" ॥
तेनास्य बहुधा निरुक्तिः।) विष्णुः। इत्यमरः। १।१।१८॥ पुन्नागवृक्षः॥ (केशाः प्रशस्ताः सन्त्यस्य। "केशाद्वोऽन्यतरस्याम्"।५।२।१०९। इति वः।) केशवति त्रि। इति मेदिनी॥ (जलस्थशवदेहः। यथा, विदग्धमुखमुण्डनम्।
"केशवं पतितं दृष्ट्वा द्रोणो हर्षमुपागतः।
रुदन्ति पाण्डवाः सर्व्वे हा! हा! केशव! केशव!"॥
के जले शवं पतितं दृष्ट्वा द्रोणः काकः हर्षं प्राप्तवान् पाण्डवाः शृगालाः रुदन्ति चीत्कारं कुर्व्वन्तीत्यर्थः॥)

केशवर्द्धिनी, स्त्री, (केशाः वर्द्धन्तेऽनया। केश+वृध्+करणे ल्युट् टित्वात् ङीप्।) सहदेवीलता। इति राजनिर्घण्टः॥

केशवायुधः, (केशवस्य विष्णोरायुधाकारं मुकुलादस्य।) आम्रवृक्षः। इति शब्दमाला। (केशवस्य विष्णोः आयुधं अस्त्रम्। इति विग्रहे पुं, विष्णोरस्त्रे, क्ली॥)

केशवालयः, पुं, (केशवस्य आलयः वासस्थानम्।) अश्वत्थवृक्षः। इति त्रिकाण्डशेषः॥

केशवावासः, पुं, (आवसत्यस्मिन् इति। आ+वस्+अधिकरणे घञ्।) केशवस्य आवासः अश्वत्थवृक्षः। इति जटाधरः॥

केशवेशः, पुं, (केशस्य कुन्तलस्य वेशः बन्धनरूपवेण्यादिभिर्विन्यास इति यावत्।) कवरी। इत्यमरः॥ चुलेरखोँपा इति भाषा। (यथा, आश्वलायनगृह्ये।१।१७।१७। "कुलधर्म्मं केशवेशान् कारयेत्"। "एकशिखस्त्रिशिखः पञ्चशिखो वा" इति बौधायनः। "पर्व्वशिखः परशिखः" इति कुलधर्म्माः। "तेषु यो यस्य कुलधर्म्मः तेन तस्य केशसन्निवेशान् कारयेत्" इति नारायणीवृत्तिः॥)

केशहन्त्री, स्त्री, (केशस्य हन्त्री नाशिनी। यद्वा केशान् हन्ति या। केश+हन्+तृच् ततो ङीप्।) शमीवृक्षः॥ इति राजनिर्घण्टः॥

केशहस्तः, पुं, (केशानां केशस्य वा हस्तः समूहः। हस्तादयश्च केशात् समूहार्थे।) केशसमूहः। इत्यमरः॥

केशाकेशि, क्ली, केशेषु केशेषु गृहीत्वा प्रवृत्तं युद्धम्। ("तत्र तेनेदमिति सरूपे"।२।२।२७। इति कर्म्मव्यतिहारे इच समासे पूर्व्वदीर्घः।) अन्योन्यकेशग्रहणपूर्व्वकप्रवृत्तयुद्धम्। इति व्याकरणम्॥ चुलाचुलि इति भाषा।
(यथा, महाभारते।३।२८३।३७।
"केशाकेश्यभवद्युद्धं रक्षसां वानरैः सह"॥)

केशारुहा, स्त्री, (केशा आरोहन्त्यनया। आ+रुह+करणे घञर्थे कः।) सहदेवीलता। इति राजनिर्घण्टः॥

केशार्हा, स्त्री, (केशं केशवर्णं अर्हति इति। केश+अर्ह+"कर्म्मण्यण्"।३।२।१। इति अण्।) महानीली। इति राजनिर्घण्टः॥

केशिकः, त्रि, (प्रशस्तः केशः अस्यास्तीति ठन्।) प्रशस्तकेशयुक्तः। इत्यमरः।२।६।४५॥

केशिका, स्त्री, (केशीव कायति प्रकाशते। केशिन्कै+कः।) शतावरी। इति राजनिर्घण्टः॥

केशिनिसूदनः, पुं, (केशीत्याख्यः दानवः कंसासुरचरस्तं निसूदयति हन्ति। नि+सूद+कर्त्तरि ल्युः।) श्रीकृष्णः। (यथा, गीतायां १८।१।
"सन्न्यासस्य महाबाहो! तत्त्वमिच्छामि वेदितुम्।
त्यागस्य च हृषीकेश! पृथक् केशिनिसूदन!"॥
केशिदानववधविवरणं हरिवंशे ८० अध्याये दृश्यम्।)

केशिनी, स्त्री, (केशाकाराः सन्त्यस्याः।) जटामांसी। इति राजनिर्घण्टः॥ चोरपुष्पी। प्रशस्तकेशविशिष्टा। इत्यमरः।२।६।४५॥

केशिसूदनः, पुं, (केशिनं तदाख्यया प्रसिद्धं दैत्यं सूदयतीति। केशिन्+सूद+कर्त्तरि ल्युः।) श्रीकृष्णः। इति त्रिकाण्डशेषः॥ (केशिदानववधविवरणं हरिवंशे ८० अध्याये द्रष्टव्यम्॥)

केशिहा, [न्] पुं, (केशिनं हतवान्। हन्+क्विप्) श्रीकृष्णः। इति हेमचन्द्रः॥

केशी, [न्] त्रि, (प्रशस्ताः केशाः सन्त्यस्य।) प्रशस्तकेशयुक्तः। इत्यमरः।२।६।४५॥

केशी, [न्] पुं, (केशः सर्व्वज्ञा शक्तिरस्यास्तीति।) विष्णुः। इति त्रिकाण्डशेषः॥ दैत्यभेदः। इति मेदिनी॥ (यथा, हरिवंशे।८०।६५।
"यस्मात्त्वया हतः केशी तस्मात् मच्छासनं शृणु।
केशवो नाम नाम्ना वै ख्यातो लोके भविष्यसि"॥
केशाः केसरा सन्त्यस्य।) सिंहः। इति शब्दरत्नावली॥

केशी, स्त्री, (केश+स्त्रियां गौरादित्वात् ङीष्।) नीली। इति राजनिर्घण्टः॥ भूतकेशीवृक्षः॥ अजलोमावृक्षः। इति रत्नमाला॥

केशोच्चयः, पुं, (केशानां उच्चयः समूहः।) केशसमूहः। इति हेमचन्द्रः॥

केश्यं, क्ली, (केशाय हितं इति यत्।) कृष्णागुरु। भृङ्गराजे, पुं। इति राजनिर्घण्टः॥ (केशहितकारके, त्रि॥)

केसरं, क्ली, (के जले सरतीति। सृ+अच्।) हिङ्गुः इति हेमचन्द्रः॥ नागकेसरपुष्पम्। कासीसम्। स्वर्णम्। इति राजनिर्घण्टः॥

केसरः, पुं, (के हृच्छिरोऽवच्छेदे उच्छ्रितदेशे इत्यर्थः सरति। सृ+अच्।) नागकेशरवृक्षः। तुरङ्गस्कन्धकेशः। (यथा, रघुवंशे।४।६७।
"विनीताध्वश्रमास्तस्य सिन्धुतीरविचेष्टनैः।
दुधुवुर्वाजिनः स्कन्धान् लग्नकुङ्कुमकेसरान्"॥)
सिंहस्कन्धकेशः। (यथा, पञ्चतन्त्रे।१।२०४।
"व्याकीर्णकेसरकरालमुखा मृगेन्द्रा
नागाश्च भूरि मदराजि विराजमानाः"॥)
वकुलवृक्षः। (यथा, रघुवंशे।९।३६।
"ललितविभ्रमबन्धविचक्षणं
सुरभिगन्धपराजितकेसरम्"॥)
पुन्नागवृक्षः। किञ्जल्कः। इति हेमचन्द्रः॥

केसरः, पुं क्ली, (के जले सरतीति। सृ+पचाद्यच्। हलदन्तादिति अलुक्समासः।) किञ्जल्कः। हिङ्गुनि, पुं क्ली। इति रभसः॥

केसरवरं, क्ली, (केसरेषु वरं श्रेष्ठं गुणाधिक्यात्। यद्वा, केसरेण किञ्जल्केन वृणोतीति। वृ+अच्।) कुङ्कुमम्। इति राजनिर्घण्टः॥

केसराम्लः, पुं, (के जलनिमित्तकः सरः अम्लः तद्रसो यस्य।) वीजपूरः। इति राजनिर्घण्टः॥

केसरिका, स्त्री, (के जले सरति स्वाद्यतया साधुकारितया वा। वुन् अलुक्समासः। ततष्टाप् अत इत्वम्।) सहदेवीलता। इति राजनिर्घण्टः॥

केसरिसुतः, पुं, (केसरी स्वनामख्यातो वानरभेदः तस्य सुतः पुत्त्रः।) हनूमान्। इति हेमचन्द्रः॥
(यथा, महाभारते ३।१४७।२७।
"अहं केसरिणः क्षेत्रे वायुना जगदायुना।
जातः कमलपत्राक्ष! हनूमान् नाम वानरः"॥)

केसरी, [न्] पुं, (केसराः जटाः सन्त्यस्य। केसर+इनिः।) सिंहः। घोटकः। पुन्नागः। नागकेशरः। इति मेदिनी। रक्षाशिग्रुः। इति राजनिर्घण्टः॥ वानरविशेषः। स तु हनूमत्पिता।
(यथा, रामायणे।७।४०।१९।
"सूर्य्यदत्तवरः स्वर्णः सुमेरुर्नाम पर्व्वतः।
यत्र राज्यं प्रशास्त्यस्य केसरी नाम वै पिता"॥)

कै, शब्दे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-अनिट्।) गायति। एषामादन्तत्वेन दिवादौ पाठेऽपीष्टसिद्धौ भ्वादावैकारान्तत्वेन पाठो गणकृतमनित्यमिति ज्ञापयति। तेन अयधातोरात्मनेपदानित्यत्व शपो लुकि च य्वोर्लोप इति यलोपे अयधातौ परे उपसर्गरेफो ल इति वक्तव्यात् पराशब्दस्य रेफस्य लकारे "यस्य कालः समुत्पन्नो यः पलाति स जीवति" इति सिद्धम्। वेदेषु स्वारया-